श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ पञ्चचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चचत्वारिंशः सर्गः ॥

## विभिन्ना दिशः प्रति गच्छतां वानराणां सुग्रीवसमक्षे स्वीयसोत्साहवचसां श्रावणम्

सर्वांश्चाहूय सुग्रीवः प्लवगान् प्लवगर्षभः।
समस्तांश्चाब्रवीद् राजा रामकार्यार्थसिद्धये॥ **4.45.1** ॥

एवमेतद् विचेतव्यं भवद्भिर्वानरोत्तमैः।
तदुग्रशासनं भर्तुर्विज्ञाय हरिपुङ्गवाः॥ **4.45.2** ॥

शलभा इव सञ्छाद्य मेदिनीं सम्प्रतस्थिरे।
रामः प्रस्रवणे तस्मिन् न्यवसत् सहलक्ष्मणः॥ **4.45.3** ॥

प्रतीक्षमाणस्तं मासं सीताधिगमने कृतः।
उत्तरां तु दिशं रम्यां गिरिराजसमावृताम्॥ **4.45.4** ॥

प्रतस्थे सहसा वीरो हरिः शतबलिस्तदा।
पूर्वां दिशं प्रतिययौ विनतो हरियूथपः॥ **4.45.5** ॥

ताराङ्गदादिसहितः प्लवगः पवनात्मजः।
अगस्त्याचरितामाशां दक्षिणां हरियूथपः॥ **4.45.6** ॥

पश्चिमां च दिशं घोरां सुषेणः प्लवगेश्वरः।
प्रतस्थे हरिशार्दूलो दिशं वरुणपालिताम्॥ **4.45.7** ॥

ततः सर्वा दिशो राजा चोदयित्वा यथातथम्।
कपिसेनापतिर्वीरो मुमोद सुखितः सुखम्॥ **4.45.8** ॥

एवं सञ्चोदिताः सर्वे राज्ञा वानरयूथपाः।
स्वां स्वां दिशमभिप्रेत्य त्वरिताः सम्प्रतस्थिरे॥ **4.45.9** ॥

नदन्तश्चोन्नदन्तश्च गर्जन्तश्च प्लवङ्गमाः।
क्ष्वेडन्तो धावमानाश्च विनदन्तो महाबलाः॥ **4.45.10** ॥

एवं सञ्चोदिताः सर्वे राज्ञा वानरयूथपाः।
आनयिष्यामहे सीतां हनिष्यामश्च रावणम्॥ **4.45.11** ॥

अहमेको वधिष्यामि प्राप्तं रावणमाहवे।
ततश्चोन्मथ्य सहसा हरिष्ये जनकात्मजाम्॥ **4.45.12** ॥

वेपमानां श्रमेणाद्य भवद्भिः स्थीयतामिति।
एक एवाहरिष्यामि पातालादपि जानकीम्॥ **4.45.13** ॥

विधमिष्याम्यहं वृक्षान् दारयिष्याम्यहं गिरीन्।
धरणीं दारयिष्यामि क्षोभयिष्यामि सागरान्॥ **4.45.14** ॥

अहं योजनसङ्ख्यायाः प्लवेयं नात्र संशयः।
शतयोजनसङ्ख्यायाः शतं समधिकं ह्यहम्॥ **4.45.15** ॥

भूतले सागरे वापि शैलेषु च वनेषु च।
पातालस्यापि वा मध्ये न ममाच्छिद्यते गतिः॥ **4.45.16** ॥

इत्येकैकस्तदा तत्र वानरा बलदर्पिताः।
ऊचुश्च वचनं तस्य हरिराजस्य सन्निधौ॥ **4.45.17** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे पञ्चचत्वारिंशः सर्गः॥